# Shri Shivadandakam

# શ્રીશિવદણ્ડકમ્

## Document Information

Text title : Shri Shivadandakam 02 09

File name : shivadaNDakam.itx

Category : shiva, daNDaka

Location : doc_shiva

Author : Bhaskar Rai

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-09

Latest update : July 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

Shri Shivadandakam

# શ્રીશિવદણ્ડકમ્

જય જય જગદીશ કાશીપુરાધીશ કેશીકૃતાકાશ સમ્પૂર્ણલોકેશ
સુત્રામકીનાશહસ્તોલ્લસત્પાશ નિશ્શેષવિત્તેશમુખ્યામરાધીશ
સંસારદુષ્પાશજાલાવલીનાશપૂર્વત્વદભ્યાશવાસપ્રદ
શ્રીમદુદ્યદ્યશોધામ ફાલોલ્લસત્સોમ દેવદ્વિષાં
ભીમવર્ષ્માવહન્ કામદેહં દહન્ કામમાપૂરયન્ કામદેવસ્ત્રિયા
વામનેત્રાલસદ્વામગાત્રાસુરસ્તોમવિત્રાસનોમાકલત્રાનડુન્નાથપત્રારવિન્દાભનેત્રાતિમાત્રં
પવિત્રં ગુણગ્રામપાત્રં વદામ્યેષ ગોત્રં મદીયં
ચ ગોત્રં યથા સ્યાત્પવિત્રં તથાધેહિ શમ્ભો
પ્રપન્નોઽહમમ્ભોજપત્રાક્ષ દમ્ભોલિભર્ત્રાપિ જમ્ભો
હતોઽભૂદદમ્ભોક્તિનુત્યાસ્મિ(નુત્યોઽસિ)ડિમ્ભોઽસ્મિ તે દેવ
કુમ્ભોદ્ભવસ્તુત્ય કિં ભોગિભૂષામણે મય્યુપેક્ષાં કરોષિ
ત્વમેતન્ન જાનાસિ કિં દુઃખપાથોધિમગ્નં હૃષીકૌટ્ય(કૌઘ)ભુગ્નં
ભવત્પાદલગ્નં મદીયાઘવૃન્દેન દૂરીકૃતોઽસિ ત્વમેતદ્વચસ્તે ન
યુક્તં મહાદેવ હા દૈવમેતન્મદીયં યતઃ સર્વદેવૈકવન્દ્યાદપિ
શ્રૈષ્ઠ્યયમેનોગણસ્યેતિ યન્નામજાપાદઘાનાં તતીનાં
વિનાશોઽથ નિન્દ્યપ્રચણ્ડાપિ ચણ્ડાલજાતિઃ શિવેત્યુક્તિમાત્રેણ
નિર્ધૂતનિસ્સીમપાપવ્રજા સ્યાત્ તયા સંવદેત્ સંવસેચ્ચેતિ વૈદાનિ
વાક્યાન્યપિ વ્યર્થતામાપુરિત્યાદિબાહુલ્યમત્યાહિતસ્યાસ્ય કાત્યયનીકાન્ત
ભૃત્યાવન બ્રૂહિ સત્યાનિ ચેદ્વેદવાક્યાનિ કસ્માદથ ત્વં
મમૈનસ્સમૂહેન દૂરીકૃતઃ કેઽપિ લોકે ન ચેદુદ્ધૃતાઃ સ્યુસ્ત્વયા
નૈવ યાચેઽહમપ્યપ્રસિદ્ધેસ્તદા કુમ્ભજઃ કૌશિકો ગીષ્પતિર્ભાર્ગવો
નન્દસૂનુઃ શુકો રાવણારિર્દધીચો મૃકણ્ડોઃ સુતો ગૌતમઃ
શક્રદુર્વાસમુખ્યા અમી શૈવમુખ્યાઃ પુરાણે પ્રસિદ્ધાસ્ત્વયૈવોદ્ધૃતા
માં કુતો નોદ્ધરસ્યુગ્ર ચેદ્યત્ર સૂર્યો ન ભાત્યેષ ચન્દ્રો ન તારા ન
વિદ્યુત્ કુતો હ્યગ્નિરુદ્યત્પ્રભામણ્ડલવ્યાપ્તસૂર્યાવલીકોટિકોટિપ્રકાશં

પદં તત્કથઙ્કારમીષ્ટે ભવાન્ દ્રષ્ટુમિત્યસ્તિ તે ચેતસિ, શ્રૂયતાં
તત્ર લોકે ન કેષામપિ શ્રીપદં દૃષ્ટિગં સ્યાન્ન ચાપીષ્ટમાપાદનં
તદ્યતઃસર્વલોકૈરદૃષ્ટસ્ય સદ્ભાવ એવં વ્યલીકો ભવેન્નૈવ
મે તદ્યતો બ્રહ્મવિષ્ણ્વાદિભિર્દૃશ્યતે ચેત્પદં કેન તત્કારણેનેતિ
પૃચ્છામિ તત્તપ્યમાનં તપસ્તત્ર ચેત્કારણં કિં તપસ્તદ્યદાચક્ષ્વ
ચાન્દ્રાયણં તપ્તકૃચ્છ્રં તથા સપ્તતન્તુવ્રજો ભૂરિવર્ષેષુ
નિર્ભોજનં તત્ર પૃચ્છામિ સર્વેષુ તેષુ સ્વકીયં મનોઽસન્નિરુધ્ય
સ્થિતં ચેત્કુતસ્તપ્યમાનૈસ્તપોરાશિભિર્નો ફલં જાયતે ચિત્તરોધોઽપિ
ચેત્તત્ર હેતુસ્તદા કુત્ર રોધસ્તદાચક્ષ્વ ચેત્ત્વત્સ્વરૂપે ન રૂપં
મનોગોચરો નાપિ વેદોઽપિ નિર્વક્તુમીશો યતસ્તત્ર રૂપં રસો નાપિ
ગન્ધો ન ચ સ્પર્શશબ્દૌ ન ચક્ષુર્ન કર્ણૌ ન મૂર્ધા ન વક્ત્રં
ન જિહ્વા ન પાણી ન પાદૌ ન કુક્ષિર્ન વક્ષો ન કક્ષો ન કણ્ઠો
ન પીનં કૃશં નાપિ દીર્ઘં ન ખર્વં ન નીચં ન ચોચ્ચં ન
નારી ન પણ્ડો ન નાનાપિ નાના ન ચૈકં ન સન્નાપ્યસત્ત(ત્ત)દીદૃક્
સ્વરૂપં કથં ચિત્તરમ્યં કથં વેદગમ્યં તતઃ સર્વધર્માન્
પરિત્યજ્ય નામ ત્વદીયં સદા જપ્યમેતસ્ય ધર્મસ્ય સર્વેઽપિ ધર્માઃ
કલાં ષોડશીમપ્યતિક્રાન્તુમીશાન યદ્યપ્યનીશા ન શમ્ભો મહાદેવ
શૂલિન્ પિનાકિન્ વિભો નીલકણ્ઠ ત્રયીગમ્ય શીતાંશુમૌલે ભવાનીકલત્ર
ત્રિલોકીપતે દેવચૂડામણે ! ॥ ૧॥

પુરહર હર સામ્બ ગઙ્ગાધર ત્ર્યમ્બક ક્ષેમકારિન્ કપર્દિન્ હરે
દક્ષયજ્ઞપ્રણાશિન્ પુરારે વિરૂપાક્ષ દન્તાવલારે શિવેત્યાદિનામ્નાં
ન ચાન્તોઽસ્ત્યથાપિ ત્વદીયૈકનામ સ્મરન્ વાપિ મુક્તિં વ્રજત્યેવ
તત્તે શિવેતિ સ્મરન્તં કથં માં પદં નેતુમીશાન સન્દેઘ્ધિ
ભૂયો ભવાનેતદાચક્ષ્વ કશ્ચિત્ સમસ્તે સમસ્તેઽપિ
ભૂમણ્ડલે નાસ્તિ તસ્માન્નમસ્તે કરોમિ પ્રસીદાનુકમ્પાલવાલ
પ્રભો કાલકાલાવનીપાલસઙ્ઘાન?? ??લકીલ?? જ્જટાજાલ
નેત્રસ્ફુરજ્જ્વાલ ગૌરીપતે બાલચન્દ્રસ્ફુરત્ફાલ મુણ્ડાવલીમાલ
ભૂતાવલીપાલ કાલાનલપ્રખ્ય હાલાહલસ્ફીત- કોલાહલાન્નાકપાલાદિકાન્
લોકપાલાનભિત્યક્તમન્થાનકાન્ દગ્ધઢક્કાનકાન્ શુષ્કવક્ત્રામ્બુજાન્
ત્યક્તપિત્રગ્રજાન્ દાનવૈસ્તાડિતાન્ નિર્ભરં પીડિતાન્ ગારલાત્સાધ્વસાત્
પ્રત્નરત્નાન્યપિ ત્યક્તુમિચ્છૂન્ પુનઃ સ્વીયદારાનપિ ત્યક્તુમિચ્છૂન્

નિજપ્રાણસંરક્ષણૈકપ્રવીણાન્ કૃતં કર્મ પૂર્વં નિજં નિન્દતસ્તાત
માતર્મમ ભ્રાતરત્ર સ્થિતં માં વિહાયૈવ કિં ધાવસે પશ્ય
દીનં વિષજ્વાલજાલાવૃતં તાત તાતેતિ વિક્રોશતોઽપિ સ્વકાન્
ત્યક્તુકામાન્ ભૃશં ધાવમાનાન્ વિસૃષ્ટાવમાનાન્ સુરાન્ ભૂસુરાન્
યક્ષરક્ષોગણાનત્ર હાહા કથં નો ગતિઃ સ્યાદકૂપારરૂપાદમુષ્માત્
કથં કાલકૂટાદ્ભયં યામ પારં પરં ચિન્તયાનાનદઃ પ્રાહ દેવાધિદેવો
હરિર્ભો સુરા ભૂસુરા ભૂતનાથો ભવો ભક્તિભાજાં ભયં હન્ત્યભીષ્ટં
ચ ભૂયો દદાતિ સ્વતઃ શઙ્કરસ્યાઙ્ઘ્રિસત્પઙ્કજાતં નૃણાં
શઙ્કરં મન્મુખૈઃ કૌઙ્કુમૈશ્ચન્દનૈઃ પઙ્કિલૈર્નિર્મિતં
પઙ્કવૃન્દઘ્નમુટ્ટઙ્કનં મૂલતઃ સઙ્કટસ્યાતિવૈશઙ્કટસ્યાપિ
તત્કઙ્કટીકાઙ્ઘ્રિયુગ્મઙ્કરુધ્વં હૃદિ ક્ષ્વેલકીલાવલીજાલનાશાય
ગોપાલવાચામૃતં તન્નિશમ્યૈવ તે સન્નિધિં તે વિભો ચિન્તયન્તઃ
સુરા અન્તરઙ્ગે વિષૈઃ સન્તપન્તો મખસ્યાન્તકારિન્ તવ
દ્વારમાગત્ય સદ્વારપાલાવૃતં વારયોષિદ્ગણૈઃ કીરવાગ્ભિર્યુતં
મારહન્તુર્ગણૈર્વીરભદ્રાદિભિર્દૂરદૂરે સમુત્સારયદ્ભિઃ
સુરાસ્તારયાસ્માનકૂપારમધ્યાન્ન ઇત્યારવં કુર્વતસ્તારતારેણ તે
ગારદાવાગ્નિસન્તારણં નઃ કથઙ્કારમેતદ્ભવેદિત્યભિજ્ઞાય
નિઃસારસંસારપારપ્રદં નામ વિજ્ઞાય કઞ્જાતસઞ્જાતમુખ્યામરા
જઞ્જપૂકા વિભો સામ્બ શમ્ભો મૃડ ત્વં પ્રસીદાપદબ્ધેરમુષ્માત્
ઝટિત્યુદ્ધરેતિ સ્થિતાસ્તત્પરિજ્ઞાય સર્વાન્તરઙ્ગજ્ઞ
દૃષ્ટ્વાતિકષ્ટાં દશામપ્યમીષાં કૃપાલો તદૈવાવિરાસીદ્ભવાંસ્તત્ર
કાકોલ સઞ્જ્વાલજાલાવલીલીઢ સાદ્રિદ્રુમદ્વીપપાથોધિમુર્વી સફટ્ફડ્રવં
સંસ્ફુટન્તીં ભુવર્મુખ્યલોકાધિપાન્ કીલમાલાપરિમ્લાનવક્ત્રારવિન્દાનપિ
પ્રેક્ષ્ય વીક્ષાકટાક્ષામૃતેનૈવ સંશામ્ય તત્ ક્ષ્વેલવૃન્દં
કરે બિન્દુસઙ્કાશમાવેશ્ય તદ્ભક્ષયન્ નિર્જરાન્ પાલયન્
નીલકણ્ઠાદિશબ્દૈરકુણ્ઠૌજસા ભૂરિવૈકુણ્ઠનાથાદિવૃન્દારકૌઘેન
તોષ્ટૂયમાનો નિજં ધામ કૈલાસસંજ્ઞં તદા નિર્ગતસ્તાદૃશસ્યાપિ
ચાપત્સમૂહસ્ય નાશો ભવન્નામમાત્રેણ જાતઃ શિવાતસ્ત્વદીયેન નામ્નૈવ
સમ્યક્ સ્મૃતેનાપદમ્ભોધયો ગોષ્પદત્વં ભજન્તે મહાદેવ તત્તાદૃશં
નામ શમ્ભો શિવેત્યાદિ તેઽનારતં વાસકૃદ્વોચ્ચરામીતિ નિર્ધૂતપાપે
મયિ ત્વં દયાં ધેહિ ભો ॥ ૨॥

ઇતિ યદિ શિવ શઙ્કસે કશ્ચિદન્યં પ્રપદ્યસ્વ મત્તોઽધિકં ત્વદ્ગતેઃ
સમ્પ્રદાતેતિ તત્રાપિ ચેદં સમાધાનમાકર્ણય ત્વં યથાબુદ્ધિ વક્ષ્યામિ
શમ્ભો મદીયેન વાક્યેન કોપો ન તેઽસ્તુ ત્વમેવાધિનાથસ્ત્વમેવાસિ
તાતસ્ત્વમેવાસિ માતા ત્વમેવાસિ બન્ધુસ્ત્વમેવાસિ મિત્રં ત્વમેવાખિલં
યચ્ચ ભૂતં ચ ભવ્યં તદિત્યબ્જમૌલે રુષા વચ્મિ કિઞ્ચિત્તદીશ
ક્ષમસ્વેતિ વિજ્ઞાપયામ્યાદિતસ્ત્વત્ત ઈશાન કો વા ત્રિલોક્યાં
મહાનસ્તિ તુલ્યોઽપિ ચ વ્યર્થમેતદ્વચસ્તથ્યભિન્નં કુતો ભાષસે
દન્ધનેનામુના (?) નાત્ર કોઽપિ ભ્રમાત્ત્યક્તુમીષ્ટે પદામ્ભોરુહે તે
મહાદેવ નૈતાદૃશોઽહં સુરહ્રાદિનીમુખ્યસેત્વન્તમાનીયપાયી યતોઽસ્મિ
સ્થિતિર્વા મૃતિર્વા ભવત્વીશ સંસાધયામ્યેવ પાદારવિન્દદ્વયં ન
ત્યજામ્યેવ ચેદ્દાક્ષિણાત્યો ભવેયં ત્યજેયં પુનર્વિદ્ધિ મામૌત્તરાહં
તતસ્ત્વં પરામૃશ્ય દુર્દન્ધનેનૈવ (?) મા વઞ્ચયસ્વ
પ્રભો કિં ચ ચાર્વાકૃતે પઞ્ચવક્ત્રાણિ તે સઞ્ચિતાનિ ત્વયા
ચઞ્ચદુદ્યન્મહશ્ચઞ્ચલાક્ષીદૃશામઞ્ચલૈરીષદુત્કુઞ્ચિતૈ
રાજિતૈશ્ચઞ્ચરીકાલિવત્ પઞ્ચવક્ત્રામ્બુજાન્યઞ્ચિતાનીશ ચેત્
ન્યઞ્ચતાં માદૃશાનાં ચિરં કૂજતાં દીનવાક્યાનિ કિં કર્ણમાયાન્તિ
તે સ્વર્ણરેતસ્સદાપર્ણયાલિઙ્ગિતાભ્યર્ણગાંસ્ત્વદ્ગુણાન્ વર્ણયાનાન્
સ્ફુરદ્વર્ણવાણીન્ નરાંસ્તૂર્ણમાયાહિ ચાકર્ણયૈષાં વચઃ પૂર્ણમીશાન તે
પૂર્ણતા હીયતે કિં મયા યાચિતસ્ય પ્રદાનેન તદ્બન્ધનેનૈવ વાગ્બન્ધનં
હંસિ મદ્બન્ધનં નેક્ષસેઽપ્યન્ધ એવાસિ કિં ગન્ધદન્તિદ્વિષન્
અન્ધતામિસ્રહન્ સત્યમેતદ્વચો નેતિ ચક્ષુર્દ્વયં પૂર્વમુક્તં
મયૈવેતિ યદ્વા સહસ્રાક્ષશબ્દેન સંસ્તૂયસે કિઞ્ચ પઞ્ચોત્તરા
પઙ્ક્તિરક્ષ્ણાં તવેતિ ત્રિનેત્રેતિ સાહસ્રશીર્ષત્વતસ્ત્વીક્ષણાનાં
સહસ્રત્રયં દૃશ્યતે તન્મિથો વેદવાચાં વિરોધસ્તવાનેત્રતામન્તરા
યુજ (અત્ર માતૃકાયાં ગ્રન્થપાતઃ ॥ ૩॥ લોપઃ) ??

સ્તત્ર કપ્રત્યયઃ શિષ્યતે લુબ્ધકત્વં તુ તે સુપ્રસિદ્ધં
વિભો તત્ર સાક્ષી પુનસ્સવ્યસાચી ભવદ્ભક્તિયુક્તાગ્રગણ્યોઽસ્તિ
હા દૈવ હા હા બલીયોઽસિ યો મેઽધિનાથઃ પિતા તાત તાતશ્ચ
તસ્યૈવ બાધિર્યધર્મેતરિત્વાન્ધ્યમૂકત્વલુબ્ધત્વમુખ્યેન
દોષવ્રજેનાવૃતિઃ સામ્બ દુઃખાદિદં વચ્મિ કોપો ન તે કાર્ય
ઇત્યુક્તમેવાસ્તિ ભૂયઃ શ ૃણુષ્વેશ મે ભાષિતં વસ્તુતસ્ત્વં

ભવાન્નિસ્તુલઃ સદ્ગુણૈરસ્તિ કો વા દરો યસ્તુલાં તાવકીં ગન્તુમીશો
મરુત્વન્મુખો દેવતાનાં ગણો વિષ્ણુરેકોઽસ્તિ વેદૈકવેદ્યો વિભુઃ
સોઽપિ ધાતુઃ ક્ષુતાન્નિર્ગતસ્ય ક્ષુપાખ્યસ્ય ભૂમિક્ષિતઃ પક્ષપાતં
દધાનો દધીચર્ષિણા સામ્બભક્તેન યુદ્ધં ચકારાથ ચક્રેણ
નારાયણાસ્ત્રેણ તં તાડયામાસ સર્વેઽપિ દેવા હરેશ્ચિત્તતોષાય
રોષાવિલાસ્તં નિજૈરસ્ત્રજાતૈર્મુહુસ્તાડયામાસુરેતત્ પરિજ્ઞાય વિપ્રો
ગૃણન્નામ યૌષ્માકમાદાય દર્ભસ્ય મુષ્ટિં શિવેત્યુચ્ચરન્ ક્રુદ્ધ
એકૈકદર્ભેણ સર્વાસ્ત્રજાતં નિજઘ્ને હરેરસ્ત્રજાતં તુ હુઙ્કારમાત્રેણ
સંસ્તમ્ભયામાસ પશ્ચાન્મુકુન્દો નિજાદ્દેહતઃ શમ્ભુવૃન્દાનિ
લાલાટનેત્રાણિ ચન્દ્રાર્ધમૌલીનિ કાકોલકણ્ઠાનિ દેવાસુરાણાં ગણાનપ્યજો
નિર્મમે તન્નિરીક્ષ્યેશ ભક્તસ્તવ સ્વીયદેહાદ્ગદાશઙ્ખચક્રામ્બુજાભાસિ
હસ્તાનિ સત્કૌસ્તુભોદ્ભાસિવક્ષસ્સ્થલાનીન્દિરાલિઙ્ગિતાનિ સ્વયં
દર્શયામાસ ગોવિન્દવૃન્દાનિ વેધોમુખાન્નિર્જરાણાં ગણાનપ્યધો વીક્ષ્ય
નારાયણો નિર્જિતો લજ્જિતસ્તં નનામ સ્તુવન્ સક્ષુપોઽપિ સ્વકીયાં
પ્રતિજ્ઞાં (સકૃ)વ્યર્થભૂતાં સમુદ્વીક્ષ્ય સખ્યે સ્થિતઃ કિં
ચ વિષ્ણોર્વિધેરપ્યભૂત્ સંવિવાદો મહાનુત્તમત્વે હરિર્વક્ત્યહં
શ્રેષ્ઠ ઇત્યબ્જયોનિસ્ત્વહં શ્રેષ્ઠ ઇત્યાહ તદ્વાદશાન્ત્યૈ
કૃપાકન્દ તત્રાવિરાસીદ્ભવાનુત્તમત્વં મયીત્યૂચિવાન્ તન્નિશમ્યૈવ તૌ
ક્રુદ્ધરૂપાવભૂતાં ભવન્માયયા મોહિતૌ વેદવૃન્દં પ્રતિપ્રષ્ટુમિચ્છૂ
ગતૌ તત્ર વેદૈશ્ચતુર્ભિઃ પૃથક્ શમ્ભુરેવોત્તમઃ કિં વૃથા
કત્થનં વામિતિ પ્રોક્તમેતન્નિશમ્યૈવ તૌ જાતબોધૌ પરિભ્રષ્ટમોહૌ
ભવત્પાદયુગ્મેઽઞ્જસા પેતતુઃ કિઞ્ચ કૃષ્ણઃ પુરાણપ્રણેતા
પુરા નૈમિશે પ્રાહ મૌને સદસ્યૂર્ધ્વબાહુર્હૃષીકેશ એવોત્તમો
ન ત્રિનેત્રાદયો નિર્જરા ઇત્થમાકર્ણ્ય વૈયાસિકં વાક્યમાહુર્દ્વિજા
ગચ્છ વારાણસીં વ્યાસ તે વિભ્રમસ્તત્ર વિભ્રંશમેષ્યત્યહો
ઇત્યદો વાક્યમાકર્ણ્ય વારાણસીમાગતસ્તત્ર પૂર્વોક્તવાક્યં મુનિર્વ્યાહરત્
તત્ક્ષણાદેવ સર્વે દ્વિજા યૌગપદ્યેન તં ભર્ત્સયામાસુરપ્યેષ નન્દી
ભવત્પાર્શ્વગો નિર્ગતઃ સ્તમ્ભયામાસ બાહું તદીયં તથૈવાવિમુક્તાત્
બહિઃ કારયામાસ ગૌરીપતેર્નીચતાવાદિનામત્ર વાસો ન યુક્તો યતો
મુક્તિદેયં પુરી મુક્તિબાહ્યાસ્તુ તેઽથો સ સન્તપ્તચિત્તોઽસ્તવીત્ ત્વાં તતઃ
સોઽનુજગ્રાહ નન્દીશ્વરસ્તદ્ભવન્તં વિનાન્યં ન પશ્યામિ કઞ્ચિત્પરં
કાશિકાધીશ વિશ્વેશ્વરાલોકય ત્વં કૃપાર્દ્રેક્ષણૈઃ ॥ ૪॥

॥ ઇતિ શ્રીભાસ્કરરાયકૃતં શિવદણ્ડકં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Shivadandakam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*